# Shri Ramalinga Ashtakam

# શ્રીરામલિઙ્ગાષ્ટકમ્

## Document Information

Text title : Shri Ramalinga Ashtakam 02 57

File name : rAmalingAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-57

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

Shri Ramalinga Ashtakam

# શ્રીરામલિઙ્ગાષ્ટકમ્

વેદવૃન્દવન્દિતં વરેણ્યરૂપસુન્દરં
    ધેનુદુગ્ધદોહફેનસન્નિભં સદાશિવમ્ ।
ધ્યાનધ્યેયમપ્રમેયમગ્રણે(ગણ્)યમીશ્વરં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૧॥

પઞ્ચવક્ત્રમીદૃશં ભુજઙ્ગમેશવન્દિતં
    ભાનુતારકેશ્વરાનલત્રિનેત્રધારિણમ્ ।
નાગરાજભૂષણં વિભૂતિદેહધૂસરં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૨॥

પાર્વતીપયોધરપ્રભાવિહારલાલસં
    ક્રીડનાય શૈલજાર્ધદેહભાગભોગિનમ્ ।
ઉર્વશીમુખાભિરેવ તાણ્ડવાનુરઞ્જિતં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૩॥

ઘણ્ટિકાત્રિશૂલપાશયન્ત્રરાજધારિણં
    શ્રીવસન્તભૈરવાદિસર્વરાગરાગિણમ્ ।
બિલ્વરુજ્ય(રુચ્ય)પદ્મમલ્લિકાદિપુષ્પપૂજિતં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૪॥

નેત્રજાતવેદસા પ્રસૂનપઞ્ચબાણહં
    દક્ષયજ્ઞવેદગર્ભ(?)મન્ત્રતાનુરઞ્જિતમ્ ।
શ્રીહરં પુરાપહં સુરાવલીસુખપ્રદં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૫॥

ધૂર્જટિં ત્રિલોચનં મૃડાહ્વયં સદાશિવં
    સુન્દરં વૃષાધિરૂઢમમ્બયાનુરઞ્જિતમ્ ।
શઙ્કરં કપર્દિનં મહેશ્વરં હરં શિવં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૬॥

જ્યોતીરૂપમિન્દુમૌલિમઙ્ગલપ્રદં હરં
    વિશ્વસૃષ્ટિરક્ષમીષણં મહેશ્વરં (રક્ષણપ્રણાશહેતુમીશ્વરમ્) ।
લિઙ્ગરૂપમદ્વયં(ચ)જાહ્નવીતટી(જટા)ધરં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૭॥

તથૈવ વિશ્વનાથમેવ કાશિકાપુરે સ્થિતં
    શ્રીગિરૌ ચ મલ્લિકાર્જુનેશ્વરં સુરેશ્વરમ્ ।
તથૈવ નર્મદાતટે ત્રિશૂલપાણિનં શિવં
    (શ્રી) રામલિઙ્ગમાદ્યમીશમીશ્વરં સ્મરામ્યહમ્ ॥ ૮॥

રામલિઙ્ગાષ્ટકં પુણ્યં યઃ પઠેચ્છિવસન્નિધૌ ।
શિવલોકમવાપ્નોતિ શિવેન સહ મોદતે ॥ ૯॥

॥ ઇતિ શ્રીરામલિઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Ramalinga Ashtakam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*